# Shri Shanmukha AshtottarashatanamAvalih

# श्रीषण्मुखाष्टोत्तरशतनामावलिः

## Document Information

Text title : ShaNmukhAShTottarashatanAmAvaliH

File name : ShaNmukhAShTottarashatanAmAvaliH.itx

Category : subrahmanya, aShTottrashatanAmAvalI, nAmAvalI

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan Iyer

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran

Description-comments : Selected from subrahmaNyasahasranAmAvaliH

Latest update : July 17, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 17, 2021

*sanskritdocuments.org*

# श्रीषण्मुखाष्टोत्तरशतनामावलिः

ॐ श्रीगणेशाय नमः ।

ध्यानम् -

ध्यायेत्षण्मुखमिन्दुकोटिसदृशं रत्नप्रभाशोभितम् ।
बालार्कद्युतिषट्किरीटविलसत्केयूरहारान्वितम् ॥ १॥

कर्णालम्बितकुण्डलप्रविलसद्गण्डस्थलाशोभितम् ।
काञ्चीकङ्कणकिङ्किणीरवयुतं शृङ्गारसारोदयम् ॥ २॥

ध्यायेदीप्सितसिद्धिदं शिवसुतं श्रीद्वादशाक्षं गुहम् ।
खेटं कुक्कुटमङ्कुशं च वरदं पाशं धनुश्चक्रकम् ॥ ३॥

वज्रं शक्तिमसिं च शूलमभयं दोर्भिर्धृतं षण्मुखम् ।
देवं चित्रमयूरवाहनगतं चित्राम्बरालङ्कृतम् ॥ ४॥

अथ श्रीषण्मुखाष्टोत्तरशतनामावलिः ।

ॐ अचिन्त्यशक्तये नमः ।
ॐ अग्निभुवे नमः ।
ॐ अव्यक्तलक्षणाय नमः ।
ॐ आपद्विनाशकाय नमः ।
ॐ इभवक्त्रानुजाय नमः ।
ॐ इन्द्रवन्दिताय नमः ।
ॐ ईडनीयाय नमः ।
ॐ ईशपुत्राय नमः ।
ॐ उदारकीर्तये नमः ।
ॐ उदारधिये नमः ।
ॐ ऊर्ध्वगतिदायकाय नमः ।
ॐ ऋषिदेवगणस्तुत्याय नमः ।
ॐ ऋचये नमः ।

ॐ लुलितोदारकाय नमः ।
ॐ लूतभवपाशप्रभञ्जनाय नमः ।
ॐ एणाङ्कधरसत्पुत्राय नमः ।
ॐ ऐश्वर्यदाय नमः ।
ॐ ओजस्विने नमः ।
ॐ औदार्यशीलाय नमः ।
ॐ औषधकराय नमः । २०
ॐ अंशुमते नमः ।
ॐ अम्बिकातनयाय नमः ।
ॐ कार्तिकेयाय नमः ।
ॐ कुमाराय नमः ।
ॐ क्रौञ्चदारणाय नमः ।
ॐ कुक्कुटध्वजाय नमः ।
ॐ कलाधराय नमः ।
ॐ खड्गिने नमः ।
ॐ खट्वाङ्गिने नमः ।
ॐ खेचरीजनपूजिताय नमः ।
ॐ गाङ्गेयाय नमः ।
ॐ गुहाय नमः ।
ॐ गद्यपद्यप्रियाय नमः ।
ॐ घूर्णिताक्षाय नमः ।
ॐ घनसङ्क्रमाय नमः ।
ॐ चिन्मयाय नमः ।
ॐ छादिताङ्गाय नमः ।
ॐ छविश्छदाय नमः ।
ॐ जगन्नाथाय नमः ।
ॐ जगत्साक्षिणे नमः । ४०
ॐ झञ्झानिलमहावेगाय नमः ।
ॐ ज्ञानमूर्तये नमः ।
ॐ ज्ञानमहानिधये नमः ।
ॐ टङ्कारनृत्तविभवाय नमः ।
ॐ डम्बरप्रभवाय नमः ।

ॐ ढक्कानादप्रीतिकराय नमः ।
ॐ तत्त्वज्ञाय नमः ।
ॐ तारकारये नमः ।
ॐ स्थिताय नमः ।
ॐ स्थिराय नमः ।
ॐ दयापराय नमः ।
ॐ दात्रे नमः ।
ॐ द्विषड्भुजाय नमः ।
ॐ द्विषड्कर्णाय नमः ।
ॐ दन्दशूकेश्वराय नमः ।
ॐ देवसेनेशाय नमः ।
ॐ धर्मपराय नमः ।
ॐ धृतव्रताय नमः ।
ॐ नित्यतृप्ताय नमः ।
ॐ नित्यानन्दाय नमः । ६०
ॐ पुलिन्दकन्यारमणाय नमः ।
ॐ परब्रह्मस्वरूपाय नमः ।
ॐ पृथुपराक्रमाय नमः ।
ॐ फणिवाराय नमः ।
ॐ फणिलोकविभूषणाय नमः ।
ॐ बृहद्रूपाय नमः ।
ॐ ब्रह्मेशविष्णुरूपाय नमः ।
ॐ बालरूपाय नमः ।
ॐ बहुरूपाय नमः ।
ॐ बहुदैत्यविनाशकाय नमः ।
ॐ भव्याय नमः ।
ॐ भक्तसुप्रियाय नमः ।
ॐ भगवते नमः ।
ॐ महासेनाय नमः ।
ॐ महामायिने नमः ।
ॐ मङ्गलप्रदाय नमः ।
ॐ मुक्तिदात्रे नमः ।

ॐ यशस्कराय नमः ।
ॐ यमिनांवराय नमः ।
ॐ रमणीयाय नमः । ८०
ॐ रत्नकुण्डलमण्डिताय नमः ।
ॐ लोकैकनाथाय नमः ।
ॐ लीलावते नमः ।
ॐ वरदाय नमः ।
ॐ वैद्याय नमः ।
ॐ वागीशाय नमः ।
ॐ विश्वरूपाय नमः ।
ॐ विशाखाय नमः ।
ॐ शरजन्मने नमः ।
ॐ शक्तिधराय नमः ।
ॐ शिखिवाहनाय नमः ।
ॐ शङ्कराय नमः ।
ॐ शिवाय नमः ।
ॐ षण्मुखाय नमः ।
ॐ षट्किरीटधराय श्रीमते नमः ।
ॐ षडाधाराय नमः ।
ॐ स्कन्दाय नमः ।
ॐ सुब्रह्मण्याय नमः ।
ॐ सर्वज्ञाय नमः ।
ॐ सत्यसाधकाय नमः । १००
ॐ स्वयम्जोतिषे नमः ।
ॐ स्वयम्भुवे नमः ।
ॐ सच्चिदानन्दाय नमः ।
ॐ सर्वदेवमयाय नमः ।
ॐ सर्वविघ्नविनाशनाय नमः ।
ॐ हिरण्मयाय नमः ।
ॐ क्षेमदाय नमः ।
ॐ क्षेमङ्करकुमारपरमेश्वराय नमः । १०८

इति श्रीषण्मुखाष्टोत्तरशतनामावलिः समाप्ता ।

From Sri SubrahmanyaSahasranamavali found in Skanda Puranam selected by Sri PambanSwamigal.

Encoded by Sivakumar Thyagarajan Iyer
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Shri Shanmukha AshtottarashatanamAvalih*

pdf was typeset on July 17, 2021

Please send corrections to *sanskrit@cheerful.com*